अथैकविंशोऽध्यायः ॥

नवमप्रपाठकस्य तृतीयोऽर्धः ॥

( अप्रतिरथसूक्तम् )

३९२. अप्रतिरथ ऐन्द्रः । त्रिष्टुप् । इन्द्रः ॥

११९९. आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरश्शत॰सेना अजयत्साकमिन्द्रः ॥१॥

१२००. सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥

१२०१. स इषुहस्तैस्स निषङ्गिभिर्वशी स॰स्रष्टा स युध इन्द्रो गणेन ।
स॰सृष्टजित्सोमपा बाहुशर्ध्यु३ग्रधन्वा प्रतिहिताभिरस्ता ॥३॥

धा. ४०. उ. २. स्व. ७. फे. ॥१॥

३९३. अप्रतिरथ ऐन्द्रः । त्रिष्टुप् । १ बृहस्पतिः २. ३. इन्द्रश्च ॥

१२०२. बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥१॥

---

३९२. आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः । चर्षणीनाम् । संक्रन्दनः । सम् । क्रन्दनः । अनिमिषः । अ । निमिषः । एकवीरः । एक । वीरः । शतम् । सेनाः । अजयत् । साकम् । इन्द्रः ॥ संक्रन्दनेन । सम् । क्रन्दनेन । अनिमिषेण । अ । निमिषेण । जिष्णुना । युत्कारेण । युत् । कारेण । दुश्च्यवनेन । दुः । च्यवनेन । धृष्णुना । तत् । इन्द्रेण । जयत । तत् । सहध्वम् । युधः । नरः । इषुहस्तेन । इषु । हस्तेन । वृष्णा ॥ सः । इषुहस्तैः । इषु । हस्तैः । सः । निषङ्गिभिः । नि । सङ्गिभिः । वशी । स॰स्रष्टा । सम् । स्रष्टा । सः । युधः । इन्द्रः । गणेन । स॰सृष्टजित् । स॰सृष्ट । जित् । सोमपाः । सोम । पाः । बाहुशर्धी । बाहु । शर्धी । उग्रधन्वा । उग्र । धन्वा । प्रतिहिताभिः । प्रति । हिताभिः । अस्ता ॥

१२०३. बलविज्ञायस्स्थविरꣳ प्रवीरस्सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥२॥

१२०४. गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳरभध्वम् ॥३॥

धा ३६ उ न स्व ७ ह ॥२॥

२९४. अप्रतिरथ ऐन्द्रः । त्रिष्टुप् । इन्द्रः ॥

१५०५. अभि गोत्राणि सहसा गाहमानोऽदयो वीरश्शतमन्युरिन्द्रः ।
दुश्च्यवनꣳ पृतनाषाडयुध्योऽ३स्माकꣳ सेना अवतु प्र युत्सु ॥१॥

१२०६. इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञꣳ पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥२॥

---

२९३. बृहः । पते । परि । दीय । रथेन । रक्षोहा । रक्षः । हा । अमित्रान् । अ । मित्रान् । अपबाधमानः । अप । बाधमानः । प्रभञ्जन् । प्र । भञ्जन् । सेनाः । प्रमृणः । प्र । मृणः । युधा । जयन् । अस्माकम् । एधि । अविता । रथानाम् ॥ बलविज्ञायः । बल । विज्ञायः । स्थविरः । स्थ । विरः । प्रवीरः । प्र । वीरः । सहस्वान् । वाजी । सहमानः । उग्रः । अभिवीरः । अभि । वीरः । अभिसत्वा । अभि । सत्वा । सहोजाः । सहः । जाः । जैत्रम् । इन्द्र । रथम् । आ । तिष्ठ । गोवित् । गो । वित् ॥ गोत्रभिदम् । गोत्र । भिदम् । गोविदम् । गो । विदम् । वज्रबाहुम् । वज्र । बाहुम् । जयन्तम् । अज्म । प्रमृणन्तम् । प्र । मृणन्तम् । ओजसा । इमम् । सजाताः । स । जाताः । अनु । वीरयध्वम् । इन्द्रम् । सखायः । स । खायः । अनु । सम् । रभध्वम् ॥

२९४. अभि । गोत्राणि । सहसा । गाहमानः । अदयः । अ । दय । वीरः । शतमन्युः । शत । मन्युः । इन्द्रः । दुश्च्यवनः । दुः । च्यवनः । पृतनाषाट् । अयुध्यः । अ । युध्यः । अस्माकम् । सेनाः । अवतु । प्र । युत्सु ॥ इन्द्रः । आसाम् । नेता । बृहः । पतिः । दक्षिणा । यज्ञः । पुरः । एतु । सोमः । देवसेनानाम् । देव ।

१२०७. इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुता᳚शर्द्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥३॥
धा. २७. उ. १. स्व. १. च ॥३॥

२९५. अप्रतिरथ ऐन्द्रः । त्रिष्टुप् । इन्द्रः ॥

१२०८. उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मना᳚सि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥१॥
१२०९. अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥२॥
१२१०. असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना ।
तां गूहत तममापव्रतेन यथैतेषामन्यो अन्यं न जानात् ॥३॥
धा. ३२. उ. १. स्व. ४. चु ॥४॥

२९६. अप्रतिरथ ऐन्द्र । त्रिष्टुप् । इन्द्रः ॥

१२११. अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१॥

---

सेनानाम् । अभिभञ्जतीनाम् । अभि । भञ्जतीनाम् । जयन्तीनाम् । मरुतः । यन्तु । अग्रम् ॥ इन्द्रस्य । वृष्णः । वरुणस्य । राज्ञः । आदित्यानाम् । आ । दित्या- नाम् । मरुताम् । शर्द्धः । उग्रम् । महामनसाम् । महा । मनसाम् । भुवनच्य- वानाम् । भुवन । च्यवानाम् । घोषः । देवानाम् । जयताम् । उत् । अस्थात् ॥

२९५. उत् । हर्षय । मघवन् । आयुधानि । उत् । सत्वानाम् । मामकानाम् । मना᳚सि । उत् । वृत्रहन् । वृत्र । हन् । वाजिनाम् । वाजिनानि । उत् । रथा- नाम् । जयताम् । यन्तु । घोषाः ॥ अस्माकम् । इन्द्रः । समृतेषु । सम् । ऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु । अस्माकम् । वीराः । उत्तरे । भवन्तु । अस्मान् । उ । देवाः । अवत । हवेषु ॥ असौ । या । सेना । मरुतः । परेषाम् । अभ्येति । अभि । एति । नः । ओजसा । स्पर्धमाना । ताम् । गूहत ।

१२१२. प्रेता जयता नर इन्द्रो वश्शर्म यच्छतु ।
उग्रा वस्सन्तु बाहवोऽनाधृष्या यथासथ ॥२॥

१२१३. अवसृष्टा परा पत शरव्ये ब्रह्मश॰ँसिते ।
गच्छामित्रान्प्र पद्यस्व मामीषां कञ्चनोच्छिषः ॥३॥

धा. १८. उ. २. स्व. २. हा. ॥५॥

२९७. प्रजापतिः । त्रिष्टुबनुष्टुप्पङ्क्तयः । इन्द्रः ॥

१२१४. कङ्कास्सुपर्णा अनु यन्त्वेनान्गृध्राणामन्नमसावस्तु सेना ।
मैषां मोच्यघहारश्च नेन्द्र वया॰ँस्येनाननुसंयन्तु सर्वान् ॥१॥

१२१५. अमित्रसेनां मघवन्नस्माञ्छत्रुयतीमभि ।
उभौ तामिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥२॥

१२१६. यत्र बाणास्संपतन्ति कुमारा विशिखा इव ।
तत्र नो ब्रह्मणस्पतिरदितिश्शर्मयच्छतु विश्वाहा शर्म यच्छतु ॥३॥

धा. २०. उ. न. स्व. २. या. ॥६॥

---

तमसा । अपव्रतेन । अप । व्रतेन । यथा । एतेषाम् । अन्यः । अन् । यः । अन्यम् । अन् । यम् । न । जानात् ॥

२९६. अमीषाम् । चित्तम् । प्रतिलोभयन्ती । प्रति । लोभयन्ती । गृहाण । अङ्गानि । अप्वे । परा । इहि । अभि । प्र । इहि । निः । दह । हृत्सु । शोकैः । अन्धेन । अमित्राः । अ । मित्राः । तमसा । सचन्ताम् ॥ प्र । इत । जयत । नरः । इन्द्रः । वः । शर्म । यच्छतु । उग्राः । वः । सन्तु । बाहवः । अनाधृष्याः । अन् । आधृष्याः । यथा । असथ ॥ अव । सृष्टा । परा । पत । शरव्ये । ब्रह्मश॰ँसिते । ब्रह्म । श॰ँसिते । गच्छ । अमित्रान् । अ । मित्रान् । प्र । पद्यस्व । मा । अमीषाम् । कम् । च । न । उत् । शिषः ॥

२९७. कङ्काः । सुपर्णाः । सु । पर्णाः । अनु । यन्तु । एनान् । गृध्राणाम् । अन्नम् । असौ । अस्तु । सेना । मा । एषाम् । मोचि । अघहारः । अघ । हारः ।

२९८. अप्रतिरथः शासो भरद्वाजो वा । अनुष्टप्विराड्जगत्यौ । इन्द्रः ॥

१२१७. वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥१॥

१२१८. वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माँ अभिदासत्यधरं गमया तमः ॥२॥

१२१९. इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ ।
तौ युञ्जीत प्रथमौ योग आगते
याभ्यां जितमसुराणाꣳसहो महत् ॥३॥

धा. २९. उ. २. स्व. ३. थि. ॥७॥

---

च । नः । इन्द्र । वयाꣳसि । एनान् । अनुसंयन्तु । अनु । संयन्तु । सर्वान् ॥
अमित्रसेनाम् । अमित्र । सेनाम् । मघवन् । अस्मान् । शत्रुयतीम् । अभि ।
उभौ । ताम् । इन्द्र । वृत्रहन् । वृत्र । हन् । अग्निः । च । दहतम् । प्रति ॥ यत्र ।
बाणाः । संपतन्ति । सम् । पतन्ति । कुमाराः । विशिखाः । वि । शिखाः । इव ।
तत्र । नः । ब्रह्मणः । पतिः । अदितिः । अ । दितिः । शर्म । यच्छतु । विश्वाहा ।
शर्म । यच्छतु ॥

२९८. वि । रक्षः । वि । मृधः । जहि । वि । वृत्रस्य । हनू इति । रुज ।
वि । मन्युम् । इन्द्र । वृत्रहन् । वृत्र । हन् । अमित्रस्य । अ । मित्रस्य । अभि-
दासतः । अभि । दासतः ॥ वि । नः । इन्द्र । मृधः । जहि । नीचा । यच्छ ।
पृतन्यतः । यः । अस्मान् । अभिदासति । अभि । दासति । अधरम् । गमय ।
तमः ॥ इन्द्रस्य । बाहू इति । स्थविरौ । स्थ । विरौ । युवानौ । अनाधृष्यौ । अन् ।
आधृष्यौ । सुप्रतीकौ । सु । प्रतीकौ । असह्यौ । अ । सह्यौ । तौ । युञ्जीत ।
प्रथमौ । योगे । आगते । आ । गते । याभ्याम् । जितम् । असुराणाम् । अ ।
सुराणाम् । सहः । महत् ॥

३९९. अप्रतिरथःपायुर्भरद्वाजः । त्रिष्टुबनुष्टुप्पङ्क्तयः । सोमेन्द्रविश्वेदेवाः ॥

१२२०. मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥१॥

१२२१. अन्धा अमित्रा भवताशीर्षाणोऽहय इव ।
तेषां वो अग्निनुन्नानामिन्द्रो हन्तु वरंवरम् ॥२॥

१२२२. यो नस्स्वोऽरणो यश्च निष्ट्यो जिघांसति ।
देवास्तꣳसर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरꣳशर्म वर्म ममान्तरम् ॥३॥

धा. २५. उ. ना. स्व. ४. वी. ॥८॥

४००. ऐन्द्रो वा जयः राहुगणो गौतमः । त्रिष्टुप् । इन्द्रविश्वेदेवाः ॥

१२२३. मृगो न भीमꣳकुचरो गिरिष्ठाꣳपरावत आ जगन्था परस्याः ।
सृकꣳसꣳशाय पविमिन्द्र तिग्मं वि शत्रून्ताढि वि मृधो नुदस्व ॥१॥

१२२४. भद्रं कर्णेभिश्शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥२॥

---

३९९. मर्माणि । ते । वर्मणा । छादयामि । सोमः । त्वा । राजा । अमृतेन । अ । मृतेन । अनु । वस्ताम् । उरोः । वरीयः । वरुणः । ते । कृणोतु । जयन्तम् । त्वा । अनु । देवाः । मदन्तु ॥ अन्धाः । अमित्राः । अ । मित्राः । भवत । अशीर्षाणः । अ । शीर्षाणः । अहयः । इव । तेषाम् । वः । अग्निनुन्नानाम् । अग्नि । नुन्नानाम् । इन्द्रः । हन्तु । वरंवरम् । वरम् । वरम् ॥ यः । नः । स्वः । अरणः । यः । च । निष्ट्यः । जिघाꣳसति । देवाः । तम् । सर्वे । धूर्वन्तु । ब्रह्म । वर्म । मम । अन्तरम् । शर्म । वर्म । मम । अन्तरम् ॥

४००. मृगः । न । भीमः । कुचरः । गिरिष्ठाः । गिरि । स्थाः । परावतः । आ । जगन्थ । परस्याः । सृकम् । सꣳशाय । सम् । शाय । पविम् । इन्द्र । तिग्मम् । वि । शत्रून् । ताढि । वि । मृधः । नुदस्व ॥ भद्रम् । कर्णेभिः । शृणुयाम । देवाः । भद्रम् । पश्येम । अक्षभिः । अ । क्षभिः । यजत्राः । स्थिरैः ।

१२२५. स्वस्ति न इन्द्रो वृद्धश्रवास्स्वस्ति नᳲपूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिस्स्वस्ति नो बृहस्पतिर्दधातु ।
स्वस्ति नो बृहस्पतिर्दधातु ॥ ओम् ॥३॥

धा. २६. उ. १. स्व. ६. कु. ॥९॥

इत्येकविंशोऽध्यायः ॥

नवमप्रपाठकस्य तृतीयोऽर्धः ॥

नवमप्रपाठकः समाप्तः ॥

उत्तरार्चिकः समाप्तः ॥

---

अङ्गैः । तुष्टुवांसः । तु । स्तुवांसः । तनूभिः । वि । अशेमहि । देवहितम् । देव । हितम् । यत् । आयुः ॥ स्वस्ति । सु । अस्ति । नः । इन्द्रः । वृद्धश्रवाः । वृद्ध । श्रवाः । स्वस्ति । सु । अस्ति । नः । पूषा । विश्ववेदाः । विश्व । वेदाः । स्वस्ति । सु । अस्ति । नः । तार्क्ष्यः । अरिष्टनेमिः । अरिष्ट । नेमिः । स्वस्ति । सु । अस्ति । नः । बृहः । पतिः । दधातु ॥ ओम् । स्वस्तिनोबृहस्पतिर्दधातु । ओम् ॥

